shrIsubrahmaNyasiddhanAmAShTottarashatanAmAvaliH

# श्रीसुब्रह्मण्यसिद्धनामाष्टोत्तरशतनामावलिः

## Document Information

Text title : subrahmaNyasiddhanAmAShTottarashatanAmAvalI

File name : subrahmaNyasiddhanAmAShTottarashatanAmAvalI.itx

Category : aShTottarashatanAmAvalI, subrahmanya, nAmAvalI

Location : doc_subrahmanya

Author : Traditional

Transliterated by : Sivakumar Thyagarajan shivakumar24 at gmail.com

Proofread by : Sivakumar Thyagarajan shivakumar24 at gmail.com

Source : Subrahmanyastutimanjari p 176-178

Acknowledge-Permission: Mahaperiaval Trust

Latest update : November 22, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2022

*sanskritdocuments.org*

# श्रीसुब्रह्मण्यसिद्धनामाष्टोत्तरशतनामावलिः

ॐ श्रीगणेशाय नमः ।

ॐ ह्रीम् सुब्रह्मण्याय नमः । ज्ञानशक्तये ।
अचिन्त्याय । दहरालयाय । चिच्छिवाय ।
चिद्घनाय । चिदाकारमहीद्वीपमध्यदेशसदालयाय ।
चिदब्धिमथनोत्पन्नचित्सारमणिमण्डलाय ।
चिदानन्दमहासिन्धुमध्यरत्नशिखामणये ।
विज्ञानकोशविलसदानन्दमृतमण्डलाय ।
वाचामगोचरानन्तशुद्धचैतन्यविग्रहाय ।
मूलकन्दस्थचिद्देशमहाताण्डवपण्डिताय ।
षड्कोणमार्गविलसत्परमण्डलमण्डिताय ।
द्वादशारमहापद्मस्थितचिद्व्योमभासुराय ।
त्रिकोणाख्यमहापीठस्थितचिद्बिन्दुनायकाय ।
बिन्दुमण्डलमध्यस्थचिद्विलासप्रकाशकाय ।
षड्कोणमन्दिरोद्भासिमध्यस्तम्भाशिरोमणये ।
प्रथमाक्षरनिर्दिष्टपरमार्थार्थविग्रहाय ।
अकारादिक्षकारान्तमातृकाक्षर सङ्गताय ।
अकाराख्यप्रकाशात्ममहालक्ष्यार्थविग्रहाय नमः । (२०)

ॐ हकाराख्यविमर्शात्ममहालक्ष्यार्थविग्रहाय नमः ।
ग्रन्थित्रयमहाभेदचतुराय । सद्गुरवे ।
हृदयाम्बुजमध्यस्थविरजव्योमनायकाय । शान्ताद्रिनिलयाय ।
अखण्डाकारकज्ञानलक्षणाय । सजातीयविजातीयस्वगतभेदरहिताय ।
ब्रह्मविद्यास्वरूपहैमवतीतनूजाय । चिदग्निसम्भूताय ।
भूमानन्दपरिपूर्णाचलविराजिताय । महावाक्योपदेष्ट्रे ।
शिवगुरवे । मूलाधारमुखोत्पन्नब्रह्मरन्ध्रचिदालयाय ।
मध्यनाडीमहामार्गस्थितमण्डलमध्यगाय ।

हंसमार्गैकनिरतज्ञानमण्डलचिद्रसाय ।
सदोदितमहाप्रज्ञाकाराय । सहस्रारकमलान्तस्थबिन्दुकूटमहागुरवे ।
स्वात्मन्यारोपितसमस्त जगदाधाराय ।
सर्वाधिष्ठानचिन्मात्रस्थानमध्यविराजिताय ।
सर्वोपनिषदुद्घुष्टमहाकीर्तिधराय नमः । (४०)

ॐ स्वसाम्राज्यसुखासीनस्वयञ्ज्योतिः स्वरूपाय नमः ।
कार्यसहितमायाविध्वंसकाय ।
सर्ववेदान्तसिद्धान्तमहासाम्राज्यदीक्षिताय ।
सालम्बननिरालम्बवृत्तिमध्यस्थरूपकाय ।
मोक्षलक्ष्मीप्रदात्रे । शुद्धचैतन्यकान्तारसिद्धाय ।
भानूकूटप्रतीकाशचित्पर्वतशिखामणये ।
भावाभावकलातीतशून्यग्राममहेश्वराय ।
कल्पितपञ्चकृत्याधिपतये ।
ब्रह्मविद्यामयग्रामचिदालयमहाप्रभवे ।
प्रत्यग्भूतमहामौनगोचराय । शुद्धचिद्रसाय ।
हृदयग्रन्थिभेदविद्याविशारदाय । कामाद्यरिषड्वर्गनाशकाय ।
सर्वज्ञत्वादिगुणमुर्तीकृतषडाननाय ।
कर्मब्रह्मस्वरूपवेदविलसितचरणाय ।
अत्यन्तनिर्मलाकारचैतन्यगिरिमध्यगाय ।
अद्वैतपरमानन्दचिद्विलासमहानिधये । मण्डलत्रयभासकाय ।
अनेककोटिब्रह्माण्डधारिणे नमः । (६०)

ॐ सर्वात्मकाय नमः । तत्त्वमस्यादिमहावाक्यलक्ष्यार्थस्वरूपाय ।
अविमुक्तमहापीठस्थितचिद्रूपविग्रहाय ।
अमितानन्दबोधान्तनादान्तस्थितमण्डलाय ।
अखण्डशुद्धचैतन्यस्वरूपाय ।
लोकालोककलैकमत्यपरमार्थस्वरूपाय ।
आदिमध्यान्तरहितब्रह्मानन्दनिधये ।
आधारमार्गसीमान्तवासिने । निस्तरङ्गसुखार्णवाय ।
अवाङ्मनसगोचराय । नित्यशुद्धबुद्धमुक्तसत्यस्वरूपाय ।
चिद्दीपमङ्गलज्योतिः स्वरूपाय । षड्चक्रनगरविभवेश्वराय ।
सकललोकैकनेत्रे । निष्प्रपञ्चाय । निराधाराय ।

सकलाधारस्वरूपाय । भक्तमानसरञ्जकाय ।
बाह्यानुविद्धसमाधिनिष्ठात्मगोचरवृत्तिस्वरूपदेवसेनासमेताय ।
आन्तरानुविद्धसमाधिनिष्ठात्मगोचरवृत्तिस्वरूपवल्लीपतये नमः । (८०)

ॐ अनाहतमहाचक्रस्थिताय नमः । अवस्थात्रयसाक्षिणे ।
सहस्रकोटितपनसङ्काशाय । संसारमायादुःखौघभेषजाय ।
शुद्धचित्तस्वरूपमयूराधिष्ठानाय ।
चराचरस्थूलसूक्ष्मकल्पकाय ।
ब्रह्मादिकीटपर्यन्तव्यापकाय । समस्तलोकगीर्वाणशरण्याय ।
सनकादिसमायुक्तप्रज्ञानघनविग्रहाय ।
अनन्तवेदवेदान्तसंवेद्याय । धर्मार्थकामकैवल्यदायकाय ।
सकलवेदसारप्रणवलक्ष्यार्थनिजस्वरूपाय ।
अप्राकृतमहादिव्यपुरुषाय । अज्ञानतिमिरध्वान्तभास्कराय ।
अव्ययानन्दविज्ञानसुखदाय । अचिन्त्यदिव्यमहिमारञ्जिताय ।
परानन्दस्वरूपार्थबोधकाय ।
षडम्बुरुहचक्रान्तः स्फूर्तिसौदामिनीप्रभाय ।
षड्विधैक्यानुसन्धानपरहृद्व्योमसंस्थिताय ।
निस्त्रैगुण्यमहामार्गगामिने नमः । (१००)

ॐ नित्यपूर्णचिदाकाशस्थितचिन्मण्डलाय नमः ।
कार्यकारणनिर्मुक्ताय । नादबिन्दुकलातीताय ।
शिवाब्धिमथनोत्पन्नानन्दपीयूषविग्रहाय ।
परिपूर्णपरानन्दप्रज्ञानघनलक्षणाय ।
अखण्डैकरसस्फूर्तिप्रवाहाश्रयाय । नामरूपविवर्जिताय ।
श्रीपरब्रह्मणे नमः । (१०८)

इति आत्मनाथ प्रणीतः श्रीसुब्रह्मण्यसिद्धनामाष्टोत्तरशतनामावलिः समाप्ता ।

Encoded and proofread by Sivakumar Thyagarajan shivakumar24 at gmail.com

*shrIsubrahmaNyasiddhanAmAShTottarashatanAmAvaliH*

pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*